॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

प्रथमकाण्डे षष्ठः प्रश्नः

याजमानकाण्डं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

सन्त्वा॑ सि॒ञ्चामि॒ यजु॑षा प्र॒जामायु॒र्द्धन॑ञ्च। बृह॒स्पति॑प्रसूतो॒ यज॑मान इ॒ह मा रि॑षत्॥
आज्य॑मसि स॒त्यम॑सि स॒त्यस्या॒द्ध्य॑ख्षमसि ह॒विर॑सि वैश्वान॒रव्वैँ᳚श्वदे॒वमुत्पू॑तशुष्मꣳ स॒त्यौजा॒ः
सहो॑ऽसि॒ सह॑मानमसि॒ सह॒स्वारा॑ती॒ः सह॑स्वारातीय॒तः सह॑स्व॒ पृत॑ना॒ः सह॑स्व पृतन्य॒तः। स॒ह-
स्त्र॑वीर्यमसि॒ तन्मा॑ जि॒न्वाज्य॒स्याज्य॑मसि स॒त्यस्य॑ स॒त्यम॑सि स॒त्यायु॑ ॥ [१] ॥ रसि स॒त्यशु॑-
ष्ममसि स॒त्येन॑ त्वा॒ऽभि घा॑रयामि॒ तस्य॑ ते भख्षीय पञ्चा॒नान्त्वा॒ वाता॑नाँय्य॒न्त्राय॑ ध॒र्त्राय॑ गृह्णामि
पञ्चा॒नान्त्व॑र्तू॒नाँय्य॒न्त्राय॑ ध॒र्त्राय॑ गृह्णामि पञ्चा॒नान्त्वा॑ दि॒शाँय्य॒न्त्राय॑ ध॒र्त्राय॑ गृह्णामि पञ्चा॒नान्त्वा॑
पञ्चज॒नाना᳚ँय्य॒न्त्राय॑ ध॒र्त्राय॑ गृह्णामि च॒रोस्त्वा॒ पञ्च॑बिलस्य य॒न्त्राय॑ ध॒र्त्राय॑ गृह्णामि॒ ब्रह्म॑णस्त्वा॒
तेज॑से य॒न्त्राय॑ ध॒र्त्राय॑ गृह्णामि ख्ष॒त्रस्य॒ त्वौज॑से य॒न्त्राय॑ ॥ [२] ॥ ध॒र्त्राय॑ गृह्णामि वि॒शे त्वा॑
य॒न्त्राय॑ ध॒र्त्राय॑ गृह्णामि सु॒वीर्या॑य त्वा गृह्णामि सुप्रजा॒स्त्वाय॑ त्वा गृह्णामि रा॒यस्पोषा॑य त्वा गृह्णामि
ब्रह्मवर्च॒साय॑ त्वा गृह्णामि॒ भू॒रस्माक॑ꣳ ह॒विर्दे॒वाना॑मा॒शिषो॒ यज॑मानस्य दे॒वाना᳚न्त्वा दे॒वता᳚भ्यो
गृह्णामि॒ कामा॑य त्वा गृह्णामि ॥ [३] ॥

(स॒त्यायु॒रोज॑से य॒न्त्राय॒त्रय॑स्त्रिꣳशच्च) ॥ १ ॥

ध्रु॒वो᳚ऽसि ध्रु॒वो᳚ऽहꣳ स॑जा॒तेषु॑ भूयास॒न्धीर॒श्चेत्ता॑ वसु॒विदु॒ग्रो᳚ऽस्यु॒ग्रो᳚ऽहꣳ स॑जा॒तेषु॑ भूयासमु॒-
ग्रश्चेत्ता॑ वसु॒विद॑भि॒भूर॑स्यभि॒भूर॒हꣳ स॑जा॒तेषु॑ भूयासमभि॒भूश्चेत्ता॑ वसु॒विद् यु॒नज्मि॑ त्वा॒ ब्रह्म॑णा॒

दैव्येन हव्यायास्मै वोढवे जातवेदः॥ इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयन्ते॥ यन्मे अग्ने अस्य यज्ञस्य रिष्या ॥ [४] ॥ द् यद्वा स्कन्दादाज्यस्योत विष्णो। तेन हन्मि सपत्नन्दुर्मरायुमैनन्दधामि निर्ऋत्या उपस्थे। भूर् भुवः सुवरुच्छुष्मो अग्ने यजमाना-यैधि निशुष्मो अभिदासते। अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वामर्त्यस्य ते होतर्मूर्द्धन्ना जिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय मनोऽसि प्राजापत्यम्मनसा मा भूतेना *विश वागस्यैन्द्री सपत्नक्षयणी ॥ [५] ॥ वाचा मेन्द्रियेणा *विश वसन्तमृतूनाम्प्रीणामि स मा प्रीतः प्रीणातु ग्रीष्ममृतूनाम्प्रीणामि स मा प्रीतः प्रीणातु वर्षा ऋतूनाम्प्रीणामि ता मा प्रीताः प्रीणन्तु शरदमृ-तूनाम्प्रीणामि सा मा प्रीता प्रीणातु हेमन्तशिशिरावृतूनाम्प्रीणामि तौ मा प्रीतौ प्रीणीतामग्नीषोम-योरहं देवयज्यया चक्षुष्मान् भूयासमग्नेरहन्देवयज्ययाऽन्नादो भूयासं ॥ [६] ॥ दब्धिरस्य-दब्धो भूयासममुन्दभेयमग्नीषोमयोरहन्देवयज्यया वृत्रहा भूयासमिन्द्राग्नियोरहन्देवयज्ययेन्द्रि-याव्यन्नादो भूयासमिन्द्रस्याऽहन्देवयज्ययेन्द्रियावी भूयासम्महेन्द्रस्याऽहन्देवयज्यया जेमान-म्महिमानङ्गमेयमग्नेः स्विष्टकृतोऽहन्देवयज्ययाऽऽयुष्मान्यज्ञेन प्रतिष्ठाङ्गमेयम् ॥ [७] ॥

(रिष्याँथ्सपत्नक्षयण्यन्नादो भूयासꣳषड्विꣳशच्च) ॥ २ ॥

अग्निर्मा दुरिष्टात् पातु सविताऽघशꣳसाद्यो मेऽन्ति दूरेऽरातीयति तमेतेन जेषꣳ सुरूपव-र्षवर्ण एहीमान् भद्रान् दुर्याꣳ अभ्येहि मामनुव्रता न्यु शीर्षाणि मृढ्वमिड एह्यदित एहि सरस्व-त्येहि रन्तिरसि रमतिरसि सूनर्यसि जुष्टे जुष्टिन्तेऽशीयोपहूत उपहवं ॥ [८] ॥ तेऽशीय सा मे सत्याऽऽशीरस्य यज्ञस्य भूयादरेडता मनसा तच्छकेयँय्यज्ञो दिवꣳ रोहतु यज्ञो दिवङ्गच्छतु यो देवयानः पन्थास्तेन यज्ञो देवाꣳ अप्येत्वस्मास्विन्द्र इन्द्रियन्दधात्वस्मान्राय उत यज्ञाः सच-न्तामस्मासु सन्त्वाशिषः सा नः प्रिया सुप्रतूर्तिर्मघोनी जुष्टिरसि जुषस्व नो जुष्टा नो ॥ [९] ॥ ऽसि जुष्टिन्ते गमेयम्मनो ज्योतिर् जुषतामाज्यँव्विच्छिन्नँय्यज्ञꣳ समिमन्दधातु। बृहस्पतिस्त-नुतामिमन्नो विश्वे देवा इह मादयन्ताम्॥ ब्रध्न पिन्वस्व ददतो मे मा क्षायि कुर्वतो मे मोप दसत् प्रजापतेर् भागोऽस्यूर्जस्वान् पयस्वान् प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यक्षितोऽस्यक्षित्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मिँल्लोके ॥ [१०] ॥

(उपहवंजुष्टानस्त्वा षट् च) ॥ ३ ॥

बर्हिषोऽहन्देवयज्यया प्रजावान् भूयासन्नराशꣳसस्याहन्देवयज्यया पशुमान् भूयासमग्नेः स्विष्टकृतोऽहन्देवयज्ययाऽऽयुष्मान्यज्ञेन प्रतिष्ठाङ्गमेयमग्नेरहमुज्जितिमनूज्जेषꣳ सोमस्याह मुज्जितिमनूज्जेषमग्नेरहमुज्जितिमनूज्जेषमग्नीषोमयोरहमुज्जितिमनूज्जेषमिन्द्राग्नियोरहमुज्जिति-मनूज्जेषमिन्द्रस्याह ॥ [११] ॥ मुज्जितिमनूज्जेषम्महेन्द्रस्याहमुज्जिति मनूज्जेषमग्नेः स्विष्ट-कृतोऽह मुज्जितिमनूज्जेषँव्वाजस्य मा प्रसवेनोद् ग्राभेणोदग्रभीत्। अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः॥ उद्ग्राभञ्च निग्राभञ्च ब्रह्म देवा अवीवृधन्न्। अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम्॥ एमा अग्मन्नाशिषो दोहकामा इन्द्रवन्तो ॥ [१२] ॥ वनामहे धुक्षीमहि प्रजामिषम्॥ रोहितेन त्वाऽग्निर् देवताङ्गमयतु हरिभ्यान्त्वेन्द्रो देवताङ्गमयत्वेतशेन त्वा सूर्यो देवताङ्गमयतु वि ते मुञ्चामि रशना वि रश्मीन् वि योक्त्रा यानि परिचर्तनानि धत्ता-दस्मासु द्रविणँय्यच्च भद्रम्प्र णो ब्रूताद्भागधान् देवतासु॥ विष्णोः शँय्योरहन्देवयज्यया यज्ञेन प्रतिष्ठाङ्गमेयꣳ सोमस्याहं देवयज्यया ॥ [१३] ॥ सुरेता रेतो धिषीय त्वष्टुरहन्देवयज्यया पशूनाꣳ रूपम्पुषेयन्देवानाम्पत्नीरग्निर् गृहपतिर् यज्ञस्य मिथुनन्तयोरहन्देवयज्यया मिथुनेन प्रभूयासँव्वेदोऽसि वित्तिरसि विदेय कर्माऽसि करुणमसि क्रियासꣳ सनिरसि सनिताऽसि सनेयङ्घृतवन्तङ्कुलायिनꣳ रायस्पोषꣳ सहस्रिणँव्वेदो ददातु वाजिनम् ॥ [१४] ॥

(इन्द्रस्याहमिन्द्रवन्तःसोमस्याहन्देवयज्ययाचतुश्चत्वारिꣳशच्च) ॥ ४ ॥

आ प्यायतान्ध्रुवा घृतेन यज्ञँय्यज्ञम्प्रति देवयद्भ्यः। सूर्याया ऊधोऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन्न्॥ प्रजापतेर् विभान्नाम लोकस्तस्मिꣳस्त्वा दधामि सह यजमानेन सदसि सन्मे भूयाः सर्वमसि सर्वम्मे भूयाः पूर्णमसि पूर्णम्मे भूया अक्षितमसि मा मे क्षेष्ठाः प्राच्या-न्दिशि देवा ऋत्विजो मार्जयन्तान्दक्षिणायां ॥ [१५] ॥ दिशि मासाः पितरो मार्जयन्ता-म्प्रतीच्यान्दिशि गृहाः पशवो मार्जयन्तामुदीच्यान्दिश्याप ओषधयो वनस्पतयो मार्जयन्ता-मूर्ध्वायान्दिशि यज्ञः सँव्वत्सरो यज्ञपतिर् मार्जयन्ताव्विष्णोः क्रमोऽस्यभिमातिहा गायत्रेण

छन्दसा पृथिवीमनु वि क्रमे निर्भक्तः स यन्द्विष्मो विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभेन छन्द-
साऽन्तरिक्षमनु वि क्रमे निर्भक्तः स यन्द्विष्मो विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतेन
छन्दसा दिवमनु वि क्रमे निर्भक्तः स यन्द्विष्मो विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभेन
छन्दसा दिशोऽनु वि क्रमे निर्भक्तः स यन्द्विष्मः ॥ [१६] ॥

(दक्षिणाया मन्तरिक्षमनु वि क्रमे निर्भक्तः स यन्द्विष्मो विष्णो रेकान्नत्रिंशच्च) ॥ ५ ॥

अगन्म सुवः सुवरगन्म सन्दृशस्ते मा छिथ्सि यत्ते तपस्तस्मै ते माऽऽवृक्षि सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहि वर्चोधा असि वर्चो मयि धेहीदमहममुम्भ्रातृव्यमाभ्यो दिग्भ्योऽस्यै दिवोऽस्मादन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि निर्भक्तः स यन्द्विष्मः ॥ [१७] ॥ सञ्ज्योतिषाऽभूवमैन्द्रीमावृतमन्वावर्ते समहम्प्रजया सम्मया प्रजा समहꣳ रायस्पोषेण सम्मया रायस्पोषः समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासँव्वसुमान्यज्ञो वसीयान् भूयासमग्न आयूꣳषि पवस आ सुवोर्जमिषञ्च नः। आरे बाधस्व दुच्छुनाम्॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ॥ [१८] ॥ दधत्पोषꣳ रयिम्मयि। अग्ने गृहपते सुगृहपतिरहन्त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वङ्गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा शासे तन्तवे ज्योतिष्मतीन्तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीङ्कस्त्वा युनक्ति स त्वा विमुञ्चत्वग्ने व्रतपते व्रतमचारिषन्तदशकन्तन्मेऽराधि यज्ञो बभूव स आ ॥ [१९] ॥ बभूव स प्रजज्ञे स वावृधे। स देवानामधिपतिर् बभूव सो अस्माꣳ अधिपतीन् करोतु वयꣳ स्याम पतयो रयीणाम्॥ गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञो नृवथ्सखा सदमिदप्रमृष्यः। इडावाꣳ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुद्ध्नः सभावान् ॥ [२०] ॥

(द्विष्मःसुवीर्यꣳस आपञ्चत्रिꣳशच्च) ॥ ६ ॥

यथा वै समृतसोमा एवँव्वा एते समृतयज्ञा यद्दर्शपूर्णमासौ कस्य वाऽह देवा यज्ञमागच्छन्ति कस्य वा न बहूनाँय्यजमानानाँय्यो वै देवताः पूर्वः परिगृह्णाति स एनाः श्वो भूते यजत एतद्वै देवा-

नामायतनय्ँयदाहवनीयोऽन्तराऽग्नी पशूनाङ्गार्हपत्यो मनुष्याणामन्वाहार्यपचनः पितृणामग्नि-
ङ्गृह्णाति स्व एवायतने देवताः परि ॥ [२१] ॥ गृह्णाति ताः श्वो भूते यजते व्रतेन वै मेद्ध्यो ऽग्निर्
व्रतपतिर् ब्राह्मणो व्रतभृद्व्रतमुपैष्यन् ब्रूयादग्ने व्रतपते व्रतञ्चरिष्यामीत्यग्निर् वै देवानांव्ँव्रतपति-
स्तस्मा एव प्रतिप्रोच्य व्रतमा लभते बर्हिषा पूर्णमासे व्रतमुपैति वथ्सैरमावास्यायामेतद्ध्ये-
तयोरायतनमुपस्तीर्यः पूर्वश्चाग्निरपरश्चेत्याहुर् मनुष्या ॥ [२२] ॥ इन्न्वा उपस्तीर्णमिच्छन्ति
किमु देवा येषान्नवावसानमुपास्मिञ्छ्वो यख्ष्यमाणे देवता वसन्ति य एवव्ँविद्वानग्निमुपस्तृणाति
यजमानेन ग्राम्याश्च पशवोऽवरुद्ध्या आरण्याश्चेत्याहुर् यद् ग्राम्यानुपवसति तेन ग्राम्यानव
रुन्धे यदारण्यस्याश्ञाति तेनारण्यान् यदनाश्वानुपवसेत् पितृदेवत्यः स्यादारण्यस्याश्ञाती-
न्द्रिय ॥ [२३] ॥ व्ँवा आरण्यमिन्द्रियमेवाऽऽत्मन् धत्ते यदनाश्वानुपवसेत् ख्षोधुकः स्याद्य-
दश्ञीयाद्रुद्रोऽस्य पशूनभि मन्येताऽपोऽश्ञाति तन्नेवाशितन्नेवाऽनशितन्न ख्षोधुको भवति
नास्य रुद्रः पशूनभि मन्यते वज्रो वै यज्ञः ख्षुत् खलु वै मनुष्यस्य भ्रातृव्यो यदनाऽश्वानुपवसति
वज्रेणैव साख्षात् ख्षुधम्भ्रातृव्यꣳ हन्ति ॥ [२४] ॥

(परिमनुष्याइन्द्रियꣳसाख्षात्त्रीणि च) ॥ ७ ॥

यो वै श्रद्धामनारभ्य यज्ञेन यजते नास्येष्टाय श्रद्दधतेऽपः प्र णयति श्रद्धा वा आपः श्रद्धा-
मेवाऽऽरभ्य यज्ञेन यजत उभयेऽस्य देवमनुष्या इष्टाय श्रद्दधते तदाहुरति वा एता वर्त्रन्नेदन्त्यति
वाचम्मनो वावैता नाति नेदन्तीति मनसा प्र णयतीयव्ँवै मनो ॥ [२५] ॥ ऽनयैवैनाः प्र णय-
त्यस्कन्नहविर् भवति य एवव्ँवेद यज्ञायुधानि सम्भरति यज्ञो वै यज्ञायुधानि यज्ञमेव तथ्स-
म्भरति यदेकमेकꣳ संभरेत्पितृदेवत्यानि स्युर्यथ् सह सर्वाणि मानुषाणि द्वेद्वे संभरति याज्या-
नुवाक्ययोरेव रूपङ्करोत्यथो मिथुनमेवयो वै दश यज्ञायुधानि वेद मुखतोऽस्य यज्ञः कल्पते
स्फ्यः ॥ [२६] ॥ च कपालानि चाग्निहोत्रहवणी च शूर्पञ्च कृष्णाजिनञ्च शम्या चोलूखलञ्च
मुसलञ्च दृषच्चोपला चैतानि वै दश यज्ञायुधानि य एवव्ँवेद मुखतोऽस्य यज्ञः कल्पते यो वै
देवेभ्यः प्रतिप्रोच्य यज्ञेन यजते जुषन्तेऽस्य देवा हव्यꣳ हविर् निरुप्यमाणमभि मन्त्रयेताऽग्निꣳ
होतारमिह तꣳ हुव इति ॥ [२७] ॥ देवेभ्य एव प्रतिप्रोच्य यज्ञेन यजते जुषन्तेऽस्य देवा

हव्यमेष वै यज्ञस्य ग्रहो गृहीत्वैव यज्ञेन यजते तदुदित्वा वाचय्यँच्छति यज्ञस्य धृत्या अथो मनसा वै प्रजापतिर् यज्ञमतनुत मनसैव तद्यज्ञन्तनुते रख्षसामनन्ववचाराय यो वै यज्ञय्योग आगते युनक्ति युङ्क्ते युञ्जानेषु कस्त्वा युनक्ति स त्वा युनक्त्विति त्याह प्रजापतिर् वै कः प्रजापति-नैवैनय्युँनक्ति युङ्क्ते युञ्जानेषु ॥ [२८] ॥

(वैमनःस्यैतियुनक्त्वेकादश च) ॥ ८ ॥

⋆

प्रजापतिर् यज्ञानसृजताग्निहोत्रञ्चाग्निष्टोमञ्च पौर्णमासीञ्चोक्थ्यञ्चामावास्याञ्चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत् तावानग्निष्टोमो यावती पौर्णमासी तावानुक्थ्यो यावत्यमा-वास्या तावानतिरात्रो य एवव्विँद्वानग्निहोत्रञ्जुहोति यावदग्निष्टोमेनो पाप्नोति तावदुपाऽऽप्नोति य एवव्विँद्वान् पौर्णमासीय्यँजते यावदुक्थ्येनोपाप्नोति ॥ [२९] ॥ तावदुपाऽऽप्नोति य एवव्विँद्वा-नमावास्याय्यँजते यावदतिरात्रेणोपाप्नोति तावदुपाऽऽप्नोति परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् तेन स परमाङ्काष्ठामगच्छत् तेन प्रजापतिन्निरवासाययत् तेन प्रजापतिः परमाङ्काष्ठामगच्छत् तेनेन्द्रन्निरवासाययत् तेनेन्द्रः परमाङ्काष्ठामगच्छत् तेनाऽग्नीषोमौ निरवासाययत् तेनाग्नीषोमौ परमाङ्काष्ठामगच्छताय्यँ ॥ [३०] ॥ एवव्विँद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठाङ्गच्छति यो वै प्रजातेन यज्ञेन यजते प्र प्रजया पशुभिर् मिथुनैर् जायते द्वादश मासाः सँव्वँथ्सरो द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि संपाद्यानीत्याहुर् वथ्सञ्चोपावसृजत्युखाञ्चाधि श्रयत्यव च हन्ति दृषदौ च समाहन्त्यधि च वपते कपालानि चोप दधाति पुरोडाशं ॥ [३१] ॥ चाऽधिश्रयत्याज्यञ्च स्तंबयजुश्च हरत्यभि च गृह्णाति वेदिञ्च परि गृह्णाति पत्नीञ्च संनह्यति प्रोख्षणीश्चाऽऽसादयत्याज्यञ्चैतानि वै द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि य एवꣳ संपाद्य यजते प्रजातेनैव यज्ञेन यजते प्र प्रजया पशुभिर् मिथुनैर् जायते ॥ [३२] ॥

(उक्थ्येनोपाप्नोत्यगच्छताय्यँः पुरोडाशञ्चचत्वारिꣳशच्च) ॥ ९ ॥

⋆

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमित्याह ध्रुवानेवैनान् कुरुत उग्रोऽस्युग्रोऽहꣳ सजातेषु भूयासमित्याहाप्रतिवादिन एवैनान् कुरुतेऽभिभूरस्यभिभूरहꣳ सजातेषु भूयासमित्याह य एवै-

नम्प्रत्युत्पिपीते तमुपास्यते युनज्मि त्वा ब्रह्मणा दैव्येनेत्याहैष वा अग्नेर्योगस्तेनै ॥ [३३] ॥ वैनंय्युँनक्ति यज्ञस्य वै समृद्धेन देवाः सुवर्गँल्लोकमायन्यज्ञस्य व्यृद्धेनासुरान् पराऽभावयन्नयन्मे अग्ने अस्य यज्ञस्य रिष्यादित्याह यज्ञस्यैव तथ्समृद्धेन यजमानः सुवर्गँल्लोकमेति यज्ञस्य व्यृद्धेन भ्रातृव्यान् परा भावयत्यग्निहोत्रमेताभिर् व्याहृतीभिरुप सादयेद्यज्ञमुखव्वा अग्निहोत्रम्ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म ॥ [३४] ॥ कुरुते संवँथ्सरे पर्यागत एताभिरेवोप सादयेद्ब्रह्मणैवोभयतः संवँथ्सरम्परि गृह्णाति दर्शपूर्णमासौ चातुर्मास्यान्यालभमान एताभिर् व्याहृतीभिर्हवीꣳष्यासादयेद् यज्ञमुखव्वै दर्शपूर्णमासौ चातुर्मास्यानि ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म कुरुते संवँथ्सरे पर्यागत एताभिरेवासादयेद् ब्रह्मणैवोभयतः संवँथ्सरं परिगृह्णाति यद्वै यज्ञस्य साम्ना क्रियते राष्ट्र ॥ [३५] ॥ य्यँज्ञस्या*शीर्गच्छति यदृचा विशय्यँज्ञस्या *शीर्गच्छत्यथ ब्राह्मणोऽनाशीर्केण यज्ञेन यजते सामिधेनीरनुवक्ष्यन्नेता व्याहृतीः पुरस्ताद्दध्याद् ब्रह्मैव प्रतिपदङ्कुरुते तथा ब्राह्मणः साशीर्केण यज्ञेन यजते यङ्कामयेत यजमानम्भ्रातृव्यमस्य यज्ञस्या*शीर्गच्छेदिति तस्यैता व्याहृतीः पुरोनुवाक्यायान्दध्याद् भ्रातृव्यदेवत्या वै पुरोनुवाक्या भ्रातृव्यमेवास्य यज्ञस्या ॥ [३६] ॥ ऽऽशीर्गच्छति यान् कामयेत यजमानान्थ् समावत्येनान् यज्ञस्याऽऽशीर्गच्छेदिति तेषामेता व्याहृतीः पुरोनुवाक्याया अर्द्धर्च एकान्दध्याद्याज्यायै पुरस्तादेकाय्यँाज्याया अर्द्धर्च एकान्तथैनान्थ् समावती यज्ञस्याऽऽशीर्गच्छति यथा वै पर्जन्यः सुवृष्टव्वँर्षत्येवय्यँज्ञो यजमानाय वर्षति स्थलयोदकम्परिगृह्णन्त्याशिषा यज्ञय्यँजमानः परि गृह्णाति मनोऽसि प्राजापत्यं ॥ [३७] ॥ मनसा मा भूतेनाऽऽविशेत्याह मनो वै प्राजापत्यम्प्राजापत्यो यज्ञो मन एव यज्ञमात्मन् धत्ते वागस्यैन्द्री सपत्नक्षयणी वाचा मेन्द्रियेणाऽऽविशेत्याहैन्द्री वै वाग्वाचमेवैन्द्री मात्मन् धत्ते ॥ [३८] ॥

(तेनैव ब्रह्म राष्ट्रमेवास्य यज्ञस्यप्राजापत्यꣴषड्विꣴशच्च) ॥ १० ॥

यो वै सप्तदशम्प्रजापतिय्यँज्ञमन्वायत्तव्वेँद प्रति यज्ञेन तिष्ठति न यज्ञाद् भ्रꣳशत आ श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरय्यँजेति द्व्यक्षरय्येँ यजामह इति पञ्चाक्षरन्द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिर् यज्ञमन्वायत्तो य एवव्वेँद प्रति यज्ञेन तिष्ठति न यज्ञाद्

भ्रꣳशते यो वै यज्ञस्य प्रायणम्प्रतिष्ठा ॥ [३९] ॥ मुदयनव्ँवेद प्रतिष्ठितेनारिष्टेन यज्ञेन सꣳस्था-ङ्गच्छत्याश्रावयास्तु श्रौषड्यज ये यजामहे वषट्कार एतद्वै यज्ञस्य प्रायणमेषा प्रतिष्ठैतदुदयनय्ँय एवव्ँवेद प्रतिष्ठितेनाऽरिष्टेन यज्ञेन सꣳस्थाङ्गच्छति यो वै सूनृतायै दोहव्ँवेद दुह एवैनाय्ँयज्ञो वै सूनृताऽऽश्रावयेत्यैवैनामह्वदस्तु ॥ [४०] ॥ श्रौषडित्युपावास्राग्यजेत्युदनैषीद्ये यजामह इत्युपाऽसदद् वषट्कारेण दोग्ध्येष वै सूनृतायै दोहो य एवव्ँवेद दुह एवैनान्देवा वै सत्रमासत तेषान्दिशोऽदस्यन्त एतामार्द्राम्पङ्क्तिमपश्यन्ना श्रावयेति पुरोवातमजनयन्नस्तु श्रौषडित्यभ्रꣳ समप्लावयन्यजेति विद्युत ॥ [४१] ॥ मजनयन्ये यजामह इति प्रावर्षयन्नभ्यस्तनयन् वष-ट्कारेण ततो वै तेभ्यो दिशः प्राप्यायन्त य एवव्ँवेद प्रास्मै दिशः प्यायन्ते प्रजापतिन्त्वोवेद प्रजापति स्त्वव्ँवेद यम्प्रजापतिर् वेद स पुण्यो भवत्येष वै छन्दस्यः प्रजापतिरा श्रावयाऽस्तु श्रौषड्यज ये यजामहे वषट्कारो य एवव्ँवेद पुण्यो भवति वसन्त ॥ [४२] ॥ मृतूनाम्प्रीणा-मीत्याहर्तवो वै प्रयाजा ऋतूनेव प्रीणाति तेऽस्मै प्रीता यथापूर्वङ्कल्पन्ते कल्पन्तेऽस्मा ऋतवो य एवव्ँवेदाग्नीषोमयोरहन्देवयज्यया चक्षुष्मान् भूयासमित्याहाग्नीषोमाभ्यां वै यज्ञश्चक्षुष्मान् ताभ्यामेव चक्षुरात्मन् धत्तेऽग्नेरहन्देवयज्ययाऽन्नादो भूयासमित्याहाग्निर्वै देवानामन्नादस्ते नै वा ॥ [४३] ॥ ऽन्नाद्यमात्मन् धत्ते दब्धिरस्यदब्धो भूयासममुन्दभेयमित्याहैतया वै दब्ध्या देवा असुरानदभ्नुवन्तयैव भ्रातृव्यन्दभ्नोत्यग्नीषोमयोरहन्देवयज्यया वृत्रहा भूयासमित्याहाऽग्नी-षोमाभ्याव्ँवा इन्द्रो वृत्रमहन्ताभ्यामेव भ्रातृव्यꣳ स्तृणुत इन्द्राग्नियोरहन्देवयज्ययेन्द्रियाव्यन्नादो भूयासमित्याहेन्द्रियाव्येवान्नादो भवतीन्द्रस्या ॥ [४४] ॥ ऽहन्देवयज्ययेन्द्रियावी भूयासमि-त्याहेन्द्रियाव्येव भवति महेन्द्रस्याऽहन्देवयज्यया जेमानं महिमानङ्गमेयमित्याह जेमानमेव महिमानङ्गच्छत्यग्नेः स्विष्टकृतोऽहन्देवयज्ययाऽऽयुष्मान्यज्ञेन प्रतिष्ठाङ्गमेयमित्याहायुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठति ॥ [४५] ॥

(प्रतिष्ठामह्वदस्तुविद्युतवसन्ततेनैवेन्द्रस्याऽष्टात्रिꣳशच्च) ॥ ११ ॥

इन्द्रव्ँवो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः॥ इन्द्रन्नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः। शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वन्नः॥ इन्द्रि-

याणि शतक्रतो या ते जनेषु पञ्चसु॥ इन्द्र तानि त आ वृणे॥ अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये। अनु ॥ [४६] ॥ क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये॥ आयस्मिन्थ् सप्तवासवा स्तिष्ठन्ति स्वारुहो यथा। ऋषिर्ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः॥ आमासु पक्वमैरय आ सूर्यꣳ रोहयो दिवि। घर्मन्न सामन्तपता सुवृक्तिभिर् जुष्टङ्गिर्वणसे गिरः॥ इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रँव्वाणीरनूषत॥ गायन्ति त्वा गायत्रिणो ॥ [४७] ॥ ऽर्चन्त्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रतवुद्वꣳशमिव येमिरे॥ अꣳहोमुचे प्र भरेमा मनीषा-मोषिष्ठदाव्न्ने सुमतिङ्गृणानाः। इदमिन्द्र प्रति हव्यङ्गृभाय सत्याः सन्तु यजमानस्य कामाः॥ विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः। अꣳहसो यत्र पीपरद्यथा नो नावेव यान्त मुभये हवन्ते॥ प्र सम्राजम्प्रथममध्वराणा ॥ [४८] ॥ मꣳहोमुचँव्वृषभँय्यज्ञियानाम्। अपान्नपातमश्विना हयन्तमस्मिन्नर इन्द्रियन्धत्तमोजः॥ वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। अधस्पदन्तमीङ्कृधि यो अस्माꣳ अभिदासति॥ इन्द्र क्षत्रमभि वाममोजोऽजा-यथा वृषभ चर्षणीनाम्। अपानुदो जनममित्रयन्तमुरुन्देवेभ्यो अकृणोरु लोकम्॥ मृगो न भीमः कुचरो गिरिष्ठाः परावत ॥ [४९] ॥ आ जगामा परस्याः। सृकꣳ सꣳशाय पविमिन्द्र तिग्मव्वि शत्रूꣳन् ताढि विमृधो नुदस्व॥ वि शत्रून्वि मृधो नुद विवृत्रस्य हनू रुज। वि मन्युमिन्द्र भामितोऽमित्रस्याऽभिदासतः॥ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्। हुवे नु शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ मा ते अस्याꣳ ॥ [५०] ॥ सहसावन् परिष्टावघाय भूम हरिवः परादै। त्रायस्व नोऽवृकेभिर् वरूथैस्तव प्रियासः सूरिषु स्याम॥ अन-वस्ते रथमश्वाय तक्षन् त्वष्टा वज्रम्पुरुहूत द्युमन्तम्। ब्रह्माण इन्द्रम्महयन्तो अर्कैरवर्द्धयन्नहये हन्तवा उ॥ वृष्णे यत् ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः। अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्त्तन्त दस्यून् ॥ [५१] ॥

(वृत्रहत्येऽनुगायत्रिणोऽद्ध्वराणांपरावतोऽस्यामष्टाचत्वारिꣳशच्च) ॥ १२ ॥

समाप्ति कोर्वैः

(सन्त्वा॑ सिञ्चामिध्रु॒वो॑ऽस्य॒ग्निर्मा॑ब॒र्॒हि॒षो॒ऽहमा प्या॑यता॒मग॑न्म॒यथा॒ वैयो वै श्र॒द्धां प्र॒जाप॑ति॒र् यज्ञान्ध्रु॒वो॑ऽसीत्या॑ह॒यो वै स॑प्त॒द॒शमि॑न्द्र॑वँ॑व्वो॒द्वाद॑श)

(सन्त्वा॑ब॒र्॒हि॒षो॒ऽहंयथा॒ वा॒एव॑वँ॒व्वि॒द्वाञ्छ्रौष॑ट्॒थ्सहसाव॒न्नेक॑पञ्चा॒शत्॒)

(सन्त्वा॑सिञ्चा॒मि॒ दस्यू॑न्॒)

॥ हरिः ॐ ॥

प्रथमकाण्डे षष्ठः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
१२	५१

ॐ